रिक्ततिथ्यां ॥१२॥ **अथ प्रथमादिमासेषु दंतजननफलम् ॥** मासे चेत्प्रथमे भवेत्स दशनो बालो विन
श्येत्स्वयं हन्यात्सक्रमतोऽनुजातभगिनीमात्रग्रजान् द्व्यादिके ॥ षष्ठादौ लभते हि भोगमतुलं तातात्सुख
पुष्टतां लक्ष्मीं सौख्यमथो जनौ सदशनो वोर्ध्वे स्वपित्रादिहा ॥१३॥ **अथ दोलानिक्रमणं ॥** दोलारो
हे र्कभात्स्वेच्छ५पंचार५पंचे५षु५सप्तभैः७ ॥ नैरुज्यं मरणं कार्श्यं व्याधिः सौख्यं क्रमाच्छिशोः ॥१४॥ दस्तार्क
र्क१२भूप१६धृति१८दि१०ग्जितवासरे स्याद्वारे शुभे मृदुलघुध्रुवभैः शिशूनां ॥ दोलाधिरूढिरथनि

॥ बाकूर्दतामङ्कूर्दपंक्तौ

कनिष्ठभ्राता भगिनी माता तात ज्येष्ठभ्राता एतान् ॥४॥
द्व्यादिके द्वितीयतृतीयचतुर्थपंचमे मासे क्रमेण हन्यात् ॥४॥

कुमारांश्चतुर्थमासे गामोक्षसमयेऽर्के १२ मितेन्हि वासत् ॥२५॥ अथ जलपूजा ॥ कवीज्यास्तचैत्रा
धिमासेन पौषे जलं पूजयेत्सूतिकामासपूर्णौ ॥ बुधेंदीज्यवारे विरिक्ते तिथौ हि श्रुती ज्यादितीं दर्के नेत्र
त्यमैत्रे ॥२६॥ अथान्नप्राशनम् ॥ रिक्तानंदा ४।९।१४।८।१२।६।११।१४।८ दर्श ३० हरिदिवस १२ मथो सौरि
भौमार्कवारान् ॥ लग्नं जन्मर्क्षलग्नाष्टमगृहलवगं मीनमेषालिकं च ॥ हित्वा षष्ठात्समे मास्यथ हि म
गदृशां पंचमादोजमासे नक्षत्रैः स्यात्स्थिराख्यैः समृदुलघुचरैर्बालकान्नाशनं तत् ॥२७॥ केंद्रत्रिको
णा १।४।७।१०।५।९ सहजेषु ३ शुभैः खशुद्धे लग्ने त्रिलाभरिपु ३।११।६ दुर्गैश्च वदंति पापैः ॥ लग्नाष्ट ८
षष्ठ ६ रहितं शशिनं प्रशस्तं मैत्राम्बुपानिलजनुर्भमसच्च केचित् ॥२८॥ दीनांशुपूर्णचंद्रेज्यज्ञभौमार्
किभार्गवैः ॥ त्रिकोणायव्यय १२ केंद्रस्थितैस्तत्फलं महे: ॥२९॥
भिक्षाशी यज्ञकृद्दीर्घजीवी ज्ञानी च पित्तरुक् ॥ कुष्ठी वान्नक्ले
शवातव्याधिमान्भोगभागिति ॥३०॥ अथ भूम्युपवेशनम् ॥ पृथ्वीं वराहमभिपूज्य कुजे विशुद्धे रिक्ते
तिथौ व्रजति पंचममासि बालं ॥ बध्वा शुभेऽह्नि कटिसूत्रमथ ध्रुवेंदुज्येष्ठर्क्ष मैत्र लघुभे रुपवेशयेत्को
॥३१॥ तस्मिन्काले स्थापयेत्तत्सुरस्तात् शस्त्रं शास्त्रं पुस्तकं लेखनीं च ॥ स्वर्णं रौप्यं यच्च गृह्णाति बालस्ते

क्षीणचंद्रः	पूर्णचंद्रः	गुरुः	बुध	भौम	सूर्य	शनि	शुक्र
भिक्षाशी	यज्ञकृत	चिरंजीवी	ज्ञानी	पित्तरुक्	कुष्ठी	अन्नरहितः	भोगी

वस्वंबुपे
त्रिसंस्थैः
कृतमाने५

ॐ

राजीवेस्तस्य वृत्तिः प्रदिष्टा॥२२॥अथ तांबूलभक्षणं॥ वारे भौमार्किहीने ध्रुवमृदुलघुभैर्विष्णुमूलादितीं
द्रस्वातीवस्वंबुपेते मिथुनमृगसुताकुंभगोमीनलग्ने॥ सौम्यैः केंद्रत्रिकोणोरशुभगगनगैः पापैस्तुलाभ११
त्रि३संस्थैस्तांबूलं सार्द्धमासद्वयमितसमये प्रोक्तमन्नाशनं वा॥२३॥ अथ कर्णवेधः॥ हित्वैतांश्चैत्रपौ
षौऽवमहरिशयनं जन्ममासं च रिक्तां युग्माब्दं जन्मतारामृतु६मुनि७वसुभिः८संमितेमास्यथो वा॥ ज
न्माहात्सूर्य्य१२भूपैः१६परिमितदिवसे ज्ञेज्यशुक्रेंदुवारेऽथो ओजाब्दे विष्णुयुग्मादितिमृदुलघुभैः कर्णवे
धः प्रशस्तः॥२४॥ संशुद्धे मृति८भवने त्रिकोणकेंद्रत्र्यायस्थैः शुभखचरैः कवीज्यलग्ने॥ पापाख्यैररिह
सहजाय११गेहसंस्थैर्लग्नस्थे त्रिदशगुरौ शुभावहः स्यात्॥२५॥ अथ चौलं॥ गीर्वाणांबुप्रतिष्ठा
परिणयदहनाधानगेहप्रवेशाश्चौलं राज्याभिषेको व्रतमपि शुभदं नैव याम्यायने स्यात्॥ नो वा बाल्या
स्तवार्द्धे सुरगुरुसितयोर्नैव केतूदये स्यात् सदंशं१५वार्द्धे७ चक्रेचिज्ज्ञाह्नतितमपरे यावदीनांतदुग्रे॥२६॥
पुरः पश्चाद्भृगोर्बाल्यं त्रि३दशाहं१०च वार्द्धकं॥ पक्षं१५ पंचदिनं५ ते द्वे गुरोः पक्षं१५ मुदाहृते॥२७॥ ते दश
हं द्वयोः प्रोक्तं केचित्सप्तदिनं परे॥ त्र्यहं३ बालत्वयिके ऽप्यन्ये रर्द्धाहं च ऋयहं विधोः॥२८॥ चूडावर्षात्तृ
तीयात्प्रभवति विषमेऽष्टा८र्क१२रिक्ता४।९।१४ षष्ठी६ पर्वोनाहे विचैत्रोदगयनसमये ज्ञेंदुशुक्रे

कवीज्ययोः लग्नं॥ वृषतुलाधनमीनल॥ ग्नेसति॥

॥२६ चंद्रः स्त्रियं हंति पतिं हंत्यस्तमागतः॥ यतस्त्वमृतरश्मित्वाद्बालोपि शुभदः प्राणी॥२
॥२६ बालमिंदोस्त्रिदिनं दिनार्द्धं बालत्वमस्तत्वमहर्द्वयं च॥ येनोक्तमेकं दिवसं प्रशस्तमित्येतदिंदोस्तदयुक्तमेव॥२॥
॥कार्यस्यावश्यंभाव प्रत्ययः सम्प्रयोजनमस्येत्यात्ययिकं तस्मिन्॥ लग्नांतराभावे सति अर्हं॥ २॥

अष्टमस्था: चूडा: सर्वे नष्टा: शुक्रविवर्जिता॥ शुक्रस्तु निधने चौले सर्वसंपत्करः स्मृतः॥ क्षि० श्लो० १

न्यकानां॥ धातेलग्नांशयोरस्वभनिधनगते नो नैधने ८ शुद्धियुक्ते शाक्रोपेतैर्विमैत्रे मृदुचरलघुभे राय ११ षट्‌ द्वि त्रिस्थ ३ पापैः॥ ३९॥ क्षीणचंद्रकुजसौरिभास्करैर्मृत्युशस्त्रमृतिपंगुताज्वराः॥ स्युः क्रमेण बुधजीवभार्गवैः केंद्रगैश्च शुभमिष्टतारया॥ ४०॥ पंचमासाधिके मातुर्गर्भे चौलं शिशोर्नेष्यते॥ पंचवर्षाधिकस्येष्टं गर्भिण्यामपि मातरि ४१ तारादौष्ट्येऽब्जे त्रिकोणोच्चगे वा क्षौरं सत्स्यात्सौम्यमित्रस्ववर्गे॥ सौम्ये भेऽब्जे शोभने दुष्टताराशस्ता ज्ञेया क्षौरयात्रादिकृत्ये॥ ४२॥ अनुमत्याः सूतिकायाः सूनोश्चौलादिनाचरेत्॥ ज्येष्ठापत्यस्य न ज्येष्ठे केऽप्याहुर्मार्गेऽपि नेष्यते॥ ४३॥ दंतक्षौरनखक्रियात्र विहिता चौलोदिते वारभे पातं ग्यारस्वीन्विहायनवमं भद्रां च संध्यां तथा॥ रिक्तां पर्व निशां निरासनरणग्रामप्रयाणोद्यतस्नाताभ्यक्तकृताशनैर्नहि पुनः कार्या हितप्रेप्सुभिः॥ ४४॥ ऋतुपाणिपीडमृतिबंधमोक्षणोद्वुरकर्मच द्विजनृपाज्ञया चरेत्॥ शववाहतीर्थगमसिंधुमज्जनक्षुरमाचरेन्न खलु गर्भिणीपतिः॥ ४५॥ नृपाणां हितं क्षौरमे श्मश्रुकर्म दिने पंचमे पंचमेऽस्योदये वा॥ षडग्न्यद्रि क्षिमे त्रो २ ष्ठकृः ८ पंचपित्र्यो ५ ऽद्रतो ७ ष्यर्यमा ४ क्षौरकृन्मृत्युमेति॥ ४६॥ अथाक्षरारंभः॥ गणेशविष्णुवाग्रमाः प्रपूज्य पंचमाब्दके तिथौ शिवा ११ र्क १२ दि १० ग्द्वि २ षट् ६ शर ५ त्रिके ३ रवावुदक्॥ लघुश्रवोऽनिलांत्यभादितीशतक्षमित्रभे चरोनसत्तनौ शिशोर्लिपिग्रहः सतां दिने॥ ४७॥ अथ विद्यारंभः॥ मृगात्कराच्छ्रुतेस्त्रयेऽश्विमूल

क्षौरकर्मणि हीनानां पंचमे पंचमे हनि॥ कर्तव्यं क्षौरनक्षत्रेऽप्यथवा तन्मुहूर्तके ४

पूर्वविकात्रयेगुरुदयेऽर्कजीववित्सितेन्द्रिषट्द्दस्मारपत्रिके३ ॥ शिवार्क१२दि१०ग्दिके२तिथौध्रुवांत्यमित्रभेपरैःशुभैरधीति
रुन्नमात्रिकोणकेंद्रगैःस्मृता ॥३८॥ अथ व्रतबंधः ॥ विप्राणांव्रतबंधनंनिगदितंगर्भाज्जनेर्वाष्टमेवर्षेवाप्यथपं
चमेक्षितिभुजांषष्ठेतथैकादशे ॥ वैश्यानांपुनरष्टमेप्यथपुनःस्याद्द्वादशेवत्सरेकालेथद्विगुणेगतेनिगदितेगौणंत शे२
दाहुर्बुधाः ॥३९॥ क्षिप्रध्रुवाहिचरमूलमृदुत्रिपूर्वारौद्रेर्कविद्गुरुसितेंदुदिनेव्रतंसत् ॥ द्वित्री३षु५रु११रवि१२
दिक्१०प्रमितेतिथौचशुक्लादिमत्रिलवकेपिनचापरान्हे ॥४०॥ कवीज्यचंद्रलग्नपारिपोर्दमृतौ८व्रतेधमाः ॥
व्यये१२ऽब्जभार्गवौतथातनौ१मृतौ८सुते५खलाः ॥४१॥ व्रतबंधेष्ट८षट्६रिष्फ१२वर्जिताःशोभनाःशुभाः
त्रि३षट्६आये११खलाःपूर्णोगोकर्कस्थोविधुस्तनौ ॥४२॥ विप्राधीशौभार्गवेज्यौकुजार्कौराजन्यानामोषधी
शोविशांच ॥ शूद्राणांज्ञश्चांत्यजानांशनिःस्याच्छाखेशाःस्युर्जीवशुक्रारसौम्याः ॥४३॥ शाखेशवारतनुवी
र्यमतीवशस्तंशाखेशसूर्यशशिजीवबलेव्रतंसत् ॥ जीवेभृगौरिपुगृहेविजितेचनीचेस्याद्वेदशास्त्रविधि
नारहितोव्रतेन ॥४४॥ जन्मर्क्षमासलग्नादौव्रतेविद्याधिकोव्रती ॥ आद्यगर्भेपिविप्राणांक्षत्रादीनामनादि
मे ॥४५॥ वटुकन्याजन्मराशेस्त्रिकोणाय५।९।११द्विसप्तगः७ ॥ श्रेष्ठोगुरुःख१०षट्६त्र्याद्येपूजयान्यत्र
निंदितः ॥४६॥ स्वोच्चेस्वभेस्वमैत्रेवास्वांशेवर्गोत्तमेगुरुः ॥ रिष्फ१२ष्ट८तुर्य४गोपीष्टोनीचारिस्थःशुभोप्य

॥ वर्णेशमाः नवांशाश्च सादिशुभपथमसर्धाताः ॥१॥

॥ ग्रयोदश्याद्वित्वसारि सप्तम्यादिदिनत्रयं ॥ चतुर्थ्यां प्राक्तिनी प्रोक्ता गर्भाद्वा वेते गलग्रहाः ॥ ५७ ॥

सन् ॥ ४७ ॥ कृष्णे प्रदोषेनध्याये शनौ निश्यपराह्णके । प्राक्संध्यागर्जिते नेष्टो व्रतबंधो गलग्रहे ॥ ४८ ॥ क्रूरो जडो भवेत्सौम्यः पटुः षट्कर्मकृद्गुरुः ॥ यज्ञार्थभाक्तथा मूर्खो रव्याद्यंशे तनौ क्रमात् ॥ ४९ ॥ विद्यानिरतः शुभराशिलवे पापांशगते हि दरिद्रतरः ॥ चंद्रे स्वलवे बहुदुःखयुतः कर्णादितिभेध नवांस्वलवे ॥ ५० ॥ राजसेवी वैश्यवृत्तिः शास्त्रवृत्तिश्च पाठकः ॥ प्राज्ञोर्थवान्म्लेछसेवी केंद्रे सूर्यादिखेचरैः ॥ ५१ ॥ शुक्रे जीवे तथा चंद्रे सूर्यभौमार्कि संयुते ॥ निर्गुणाः क्रूरचेष्टः स्यान्निर्दृशाः सद्युते पटुः ॥ ५२ ॥ विधोः सितांशगे सितेत्रिकोणगे गुरौ तनौ ॥ समस्तवेदविद्व्रतीयमांशगे तिनिर्दृशाः ॥ ५३ ॥ शुचिशुक्रपौषतपस्यां दिग१०न्धि२रुद्रा११र्क१२संख्यसिततिथयः ॥ भूतादित्रितया१४।१५।१६ष्टमि८ संक्रमणं चव्रतेनध्यायाः ॥ ५४ ॥ गर्के१२तर्कर्क्षत्रित्रितिथिषु प्रदोषः स्यात्तदग्रिमे ॥ रात्र्यर्द्धसार्द्धप्रहरयाममध्ये स्थितैः क्रमात् ॥ ५५ ॥ प्रागव्रह्मोदनपाकाद्व्रतबंधानंतरं यदि चेत् ॥ उत्सातानध्ययनोसन्नावपिशांतिपूर्वकं तत्स्यात् ॥ ५६ ॥ वेदक्रमाच्छशिशिवाहिकरत्रिमूलपूर्वासुपोष्णकरमैत्रमृगादितीज्ये ॥ घ्रोवेषु चाश्विवसुपुष्यकरोत्तरेषां कर्णोमृगांत्यलघुमैत्रधनादितौ सत् ॥ ५७ ॥ नांदीश्राद्धोत्तरं मातुः पुष्पेलग्नांतरे न हि ॥ शांत्या चौलं व्रतं पाणिग्रहः कार्योन्यथा न सत् ॥ ५८ ॥ अथ छुरिकाबंधनम् ॥ विचैत्रव्रतमासादावभौमास्ते विभूमिजे ॥ छुरिका

शु०	गु०	चं०	सगुणाः ३०
सू०	सू०	सू०	निर्गुणाः ३
मं०	मं०	मं	क्रूरचेष्टाः ०३
रा०	रा०	रा०	निर्दृशाः

मु०चिं०॥

॥१७॥

बंधनं वा हृतं न्नपाणौ प्राग्विवाहात् ॥५९॥ अथ समावर्त्तनं केशांतश्च ॥ केशांतः षोडशे वर्षे चौलोक्तदिवसे शुभं ॥ व्रतोक्तदिवसादौ हि समावर्त्तनमिष्यते ॥६०॥ ॥ इति श्रीदैवज्ञानंतसुतदैवज्ञरामविरचिते मुहूर्त्तचिंतामणौ सपरिकरसंस्कारप्रकरणम् ॥५॥ श्रीः ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ भार्या त्रिवर्गकरणं शुभशीलयुक्ता शीलं शुभं भवति लग्नवशेन तस्याः ॥ तस्माद्विवाहसमयः परिचिंत्यते हि तन्निघ्नतामुपगताः सुतशीलधर्माः ॥१॥ आदौ संपूज्य रत्नादिभिरथ गणकं वेदयेत्स्वस्य चित्तं कन्योद्वाहे दि१०गी८वा१९नलह्र य७विश्वाष्ट५प्रश्नलग्नाद्यदींदुः ॥ दृष्टो जीवेन सद्यः परिणयनकरो गोवृतुला७कर्कटाख्यं४वास्यास्य प्रश्नस्य लग्नं शुभखचरयुतालोकितं तद्विदध्यात् ॥२॥ विषमभांशगतौ शशिभार्गवौ तनुगृहं बलिनौ यदि पश्यतः ॥ रचयतो वरलाभमिमौ युगलभांशगतौ युवतिप्रदौ ॥३॥ षष्ठाष्टस्थः प्रश्नलग्नाद्यदींदुर्लग्ने क्रूरः सप्तमे वा कुजः स्यात् ॥ मूर्त्तौ वेंदुः सप्तमे तस्य भौमो रंडा सा स्यादष्टसंवत्सरेण ॥४॥ प्रश्नतनोर्यदि पापनभोगः पंचमगो रिपुदृष्टशरीरः ॥ नीचगतश्च तदा खलु कन्या सा कुलटाथ च मृतवत्सा ॥५॥ यदि भवति सितातिरिक्तपक्षे तनुगृहतः समराशिगः शशांकः ॥ अशुभखचरवीक्षितोऽरिरंध्रे८भवति विवाहविनाशकारकोऽयं ॥६॥ जन्मोत्थं च विलोक्य बालविधवायोगं विधाय व्रतं सावित्र्या उत पैप्पलं हि सो मामां घ

यदाप

।ाा

॥रामः॥

॥१७॥

काले विधवा प्रैष पतिस्तुलका दिवाकर तस्या ॥ सौरे पापै दृष्टे कन्यैव जरा तां समुपयाति ॥१॥ तथा लग्ने व्यये च पाताले जामित्रे चाष्टमे कुजः कन्या भर्तृविनाशाय भर्तारं कन्या विनाशयेदिति ॥२॥

सावित्र्यादि व्रतानि भर्तृकुर्वति या स्त्रियः ॥ सौभाग्यं सुखं ... ते तां सुसंततिरिति ॥२४

सुतयाद्यद्यादिमो वा रहः ॥ सल्लग्नेऽच्युतमूर्तिपिप्पलवटैः कृत्वा विवाहं स्फुटं दद्यात्तां चिरजीविनेऽत्र न भवेद्दोषः पुनर्भूभवः ॥ ७ ॥ प्रश्नलग्नेन्दुगो याह्वकापत्ययुग्मे छया कामिनी तत्र चेदा व्रजेत् ॥ कन्यका वा सुतो वा तदा पङ्क्तितेस्तादृशापत्यमस्या विनिर्दिश्यते ॥ ८ ॥ शंखभेरीविपंचीरवैर्मंगलं जायते वैपरीत्यं तदा लक्षयेत् ॥ वायसो वा खरः श्वा शृगालोपि वा प्रश्नलग्नक्षणे रोरोति नादं यदि ॥ ९ ॥ विश्वस्वातीवैष्णवपूर्वात्रयमैत्रैर्वस्वाग्नेयैर्वा करपीडोचितऋक्षैः ॥ वस्त्रालंकाराद्दिसमेतैः फलपुष्पैः संतोष्यादौ स्यादनुकन्यावरणं हि ॥ १० ॥ धरणिदेवोऽथवा कन्यकासोदरः शुभदिने गीतवाद्यादिभिः संयुतः ॥ वरवृत्तिं वस्त्रयज्ञोपवीतादिना ध्रुवयुतैर्वह्निपूर्वात्रयैर्वाचरेत् ॥ ११ ॥ गुरुशुद्धिवशेन कन्यकानां समवर्षेषु षडब्दकोपरिष्टात् ॥ रविशुद्धिवशाच्छुभो वराणामुभयोश्चन्द्रविशुद्धितो विवाहः ॥ १२ ॥ मिथुन ३ कुंभ ११ मृग १० अलि ८ वृषा २ जगे १ मिथुनगेपि रवौ त्रिलवे शुचेः ॥ अलिमृगाजगते करपीडनं भवति कार्तिकपौषमधुष्वपि ॥ १३ ॥ आद्यगर्भसुतकन्ययोर्द्वयोर्जन्ममासभतिथौ करग्रहः ॥ नोचितोऽथ विबुधैः प्रशस्यते चेद्द्वितीयजनुषोः सुतप्रदः ॥ १४ ॥ ज्येष्ठद्वंद्वं मध्यमं संप्रदिष्टं त्रिज्येष्ठं चेन्नैव युक्तं कदापि ॥ केचित्सूर्यं वह्निगं प्रोज्झ्य चाहुर्नैवान्योन्यं ज्येष्ठयोः स्याद्विवाहः ॥ १५ ॥ सुतपरिणयात्षण्मासांतः सुताकरपीडनं न च निजकुले तद्वन्मंडनादपि मुंडनं ॥ न च सहजयोर्द्वेये भ्रात्रोः सहोदरकन्यके न सहजसुतोद्वाहो वर्द्धे शुभे नपि

मु॰चिं॰ ॥ ३८ ॥

मूलग्यालोद्भवोदोषः पुंसां मौंज्येवि न श्यतीति भूपालवल्लभात् तद्दोषः स्त्रद्भविषयः ३॥

॥ अज्ञातजन्मनां नृणां नामभे परिकल्पना ॥ तेनैव चिंतयेत्सर्वं राशिकूटादिजन्मवत् ॥ जन्मभं जन्मधिष्ण्येन नामधिष्ण्येन ॥ नामभं ॥ व्यत्ययेन यदा योज्यं दंपत्योर्मरणप्रदं ॥५॥

त्क्रिया ॥ २६ ॥ वध्वावरस्यापि कुले त्रिपूरुषे नाशं व्रजेत्स्वस्यजननिश्चयोत्तरं ॥ मासोत्तरं तत्र विवाह इष्यते शांत्याथवा सूतकनिर्गमे परे ॥ २७ ॥ चूडाव्रतं चापि विवाहतो व्रताच्चूडा च नेष्टा पुरुषत्रयांतरे ॥ वधूप्रवेशाच्च सुताविनिर्गमः षण्मासतो वाब्दविभेदतः शुभः ॥ २८ ॥ श्वश्रूविनाशमहिजो सुतरां विधत्तः कन्यासुतो निरृतिजो श्वशुरं हंत्यश्व ज्येष्ठाभजाततनयास्वधवाग्रजं च शाक्राग्निजा भवति देवरनाशकर्त्री ॥ २९ ॥ द्वीशाद्यपादत्रयजा तु कन्या देवरसौख्यदा ॥ मूलांत्यपादसार्पाद्यपादजातौ तयोः शुभौ ॥ ३० ॥ वर्णो वश्यं तथा तारा योनिश्च ग्रहमैत्रकं ॥ गणमैत्रं भकूटं च नाडी चैते गुणाधिकाः ॥ ३१ ॥ द्विजा झषालिकर्कटास्ततो नृपा विशोंघ्रिजाः ॥ वरस्य वर्णतोधिका वधूर्न शस्यते बुधैः ॥ ३२ ॥ हित्वा मृगेंद्रं नरराशिवश्याः सर्वे तथैषां जलजाश्च भक्ष्याः ॥ सर्वेपि सिंहस्य वशे विना लिं ज्ञेयं नराणां व्यवहारतोन्यत् ॥ ३३ ॥ कन्यर्क्षाद्वरभं यावत्कन्याभं वरभादपि ॥ गणयेन्नवभिः शेषे त्रीष्वद्रिभमसत्स्मृतं ॥ ३४ ॥ अश्विन्यंबुपयोर्हयो निगदितः स्वात्यर्कयोः कासरः सिंहो वस्वजपादयोः समुदितो याम्यांत्ययोः कुंजरः ॥ मेषो देवपुरोहितानलभयोः कर्णांबुनोर्वानरः स्याद्वैश्वाभिजितोस्तथैव नकुलश्चांद्राब्जयोन्योरहिः ॥ ३५ ॥ ज्येष्ठामैत्रभयोः कुरंग उदितो मूलार्द्रयोः श्वा तथा मार्जारोदितिसार्पयोरथ मघायोन्योस्तथैवोंदुरः ॥ व्याघ्रो द्वीशभचित्रयोरपि च गौरार्यम्णबुध्न्यर्क्षयोर्योनिः पादगयोः परस्परमहावैरं भयोन्योस्त्यजेत् ॥ २६ ॥ मित्राणि धुमणेः

नरराक्षसो मिथुनकन्यातुलाः ६

एकांशे न पादे न तयोः १

पूर्वं पुंसः स्त्रियो पश्चात् ... ॥ तदा ...

॥ सर्व ... ॥१५॥

ति॰२

तोहिणी ३

रामः ॥ ३८ ॥

रक्षोगणे पुमान्स्याच्चेत्कन्या भवति मानवी ॥ केपि छंदंति तत्रो द्वाहं व्यस्तं कोपीह नेच्छति ॥१॥ रक्षोगणस्य च पुंसां कुमारी नरगणा भवेत् सद्भकूटं खगःप्रीतिः योनिशुद्धिः शुभं तदा ॥२॥ ६४
विषमात् कन्यकाराशेः षष्ठं षष्ठाष्टकं न सत् ॥ समात् षष्ठाष्टमं ज्ञेयं विपरीतं न शोभनं ॥१॥ ९४ वसिष्ठः ॥ द्विर्द्वादशे वा नवपंचमे वा षडष्टके राक्षसयोषितो वा ॥ एकाधिपत्ये भवनेशमैत्रे शुभाय पाणि
ग्रहणं विधेयं ॥१॥ ९४ अत्र सार्वभौमः ॥ अन्ना दोषप्रीतिः षडष्टकादिष्वत्र राशौ राशिस्वामिनोः परस्परं शत्रुत्वे समत्वे वा सति अंशपयोः न ...नवमांशस्वामिनोः बलित्वं च सखित्वे सति तासां विलिखेत् तुष्टा
दिस्थितेः तेन सबलत्वं सखिता परस्परं मैत्री ते उभे चेत् भवतः तथा नाड्यृक्षशुद्धौ ताराशुद्धिवशे च सति राशिवशे सति दुष्टकूटेऽपि विवाहः शुभः १०४

कुजेऽन्यपाशिनः शुक्रार्कजौ वैरिणौ गे सौम्यश्चास्य समो विधोर्बुधरवी मित्रे न चास्य द्विषत् ॥ शेषाश्चास्य समाः कुजस्य सुहृद
श्चंद्रेज्यसूर्या बुधः शत्रुः शुक्रशनी समौ च शशास्त्रसूनोः सितार्कस्करौ ॥२७॥ मित्रे चास्य रिपुः शशी गुरुशनिक्ष्माजाः स
माः शीघ्यतेर्मित्रशपर्के कुजेन्दवो बुधसितौ शत्रू समः सूर्यजः ॥ मित्रे सौम्यशनी कवेः शशिरवी शत्रू कुजेज्यौ समौ मित्रे शुक्र
बुधौ शनेरविशशिक्ष्माजाद्विषोऽन्यः समः ॥२८॥ रक्षोनरामरगणाः क्रमतो
मघाश्लिवस्विंद्रमूलवरुणानलतक्षराधाः ॥ पूर्वोत्तरात्रयविधात्रयमेशभानि
मैत्रादितीदुहरिपौष्णमरल्लघूनि ॥२९॥ निजनिजगणमध्ये प्रीतिरत्युत्त
मा स्यादमरमनुजयोः सा मध्यमा संप्रदिष्टा ॥ असुरमनुजयोश्चेन्मृत्युरेव प्रदि

श्रीः	र०	चं०	मं०	बु०	बृ०	शु०	शनि०	ग्रहाः
श्रीः	मं० बृ० चं०	बु० र०	चं० बृ० र०	शु० र०	र० मं० चं०	बु० श०	शु० बु०	मित्र०
श्रीः	बु०	मं० शु० बृ० श०	शु० श०	बृ० श० मं०	श०	मं० बृ०	बृ०	सम०
श्रीः	शु० श०	० ०	बु०	चं०	बु० शु०	चं० र०	र० चं० मं०	शत्रु०

ष्टो दनुजविबुधयोः स्याद्वैरमेकांततोत्र ॥३०॥ मृत्युः षडष्टके ज्ञेयोऽपत्यहानिर्नवात्मजे ॥ द्विर्द्वादशे निर्धनत्वं द्वयोरन्यत्र सौख्य
कृत् ॥३१॥ प्रोक्ते दुष्टभकूटके परिणयस्त्वेकाधिपत्ये शुभोऽथो राशीश्वरसौहृदेऽपि गदितो नाड्यृक्षशुद्धिर्यदि ॥ अन्यर्क्षेंशप
योर्बलित्वसखिते नाड्यृक्षशुद्धौ तथा तैराशुद्धिवशोच राशिवशताभावे निरुक्तो बुधैः ॥३२॥ मैत्र्यां राशिस्वामिनोरंशनाथद्व
द्वस्यापि स्याद्गणानां न दोषः ॥ खेटारित्वं नाशयेत्सद्भकूटं खेटप्रीतिश्चापि दुष्टं भकूटं ॥३३॥ ज्येष्ठारौद्रार्यमांभःपति
भयुगयुगं दस्रभं चैकनाडी पुष्येंदुत्वाष्ट्रमित्रांतकवसुजलभं योनिबु
ध्ये च मध्या ॥ वाय्वग्निव्यालविश्वोडुयुगयुगमथो पौष्णभं चापरास्या

ज्ये०	मू०	आ०	पुन	उ०फा	ह०	श०	पू०भा०	अश्वि०	आदिनाडी
पु	मृ०	चि०	अनु	भ०	ध०	पू०षा	पू०फा	उ०भा	मध्यनाडी
स्वा०	वि०	कृ०	रो०	श्ले०	म०	उ०षा	श्र०	रेव०	अंत्यनाडी

उक्तं च राशिनाथे विरुद्धेऽपि सबलत्वे वंशकाधिपे ॥ तन्मैत्रे च कर्तव्यं दंपत्योः सुखमिच्छता ॥१५
अत्रिः ॥ राशीशयोः सुहृद्भावे मित्रत्वे वांशनाथयोः । ग
णादिदोषेऽप्युद्वाहः पुत्रपौत्रप्रवर्धनः ॥१॥ ४४

एकांततः नामक्षतिकाये न ॥८

सखि

॥ मीनयुतः स्त्रीलाद्वयं मैत्री ता धन्वी कुलीरान्वितः कुंभकं न्यकयाष्टयु
तौ यामिथुनेन नक्रान्वितो जालिना योगेष्वेषु षडष्टके च विशुभः प्राणिग
ह स्याद्वापि प्राग्उक्तं च गुणत्रयं वशगतं ताराऽनुकूलं भवेत् ॥१॥

एकराशौ पृथक्धिष्ण्ये पुंतारा प्रथमा भवेत् ॥ अतीव शोभना प्रोक्ता स्त्रीतारा चेन्न शोभना ॥१॥ ३४

भामिनी जन्मनक्षत्रात् द्वितीयं पतिजन्मभं ॥ भर्तृनाशो न संदेहः ॥

प्रथमसमभागमेनक्षत्रे चेक्रज्जहनक्षत्रे वा विचारणीय १

नमिस्तु केवलया मलेश्चस्तु केसाद्वास त्वमे वर्ज्यं समविधाने नदोषः ॥४॥

जन्मभं जन्मधिष्ण्येन नाम धिष्ण्येन नाम भं ॥ व्यत्ययेन यदा योज्यं

जन्मनक्षत्रात्तायापापमात्र वशी ॥८॥ प्रसिद्धनजन्मनां न्यूनं नामभे परिकल्पना ॥ नैव बलिंतयेत्सर्वं राशिकूटादि जन्मवत् ॥९॥

दंपत्योर्निधनप्रदं इति ॥१॥ ३४

हृत्पत्योरेकनाड्यां परिणयनमसन्मध्यनाड्यां हि मृत्युः ॥ ३४ ॥ पौष्णेशाग्निक्राद्रुसर्पर्यं नंदं पूर्वार्द्धमध्यापरभागयुग्मं ॥ भर्तुः प्रियः प्राग्युजि मे स्त्रियः स्यान्मध्ये द्वयोः प्रेमपरे प्रिया स्त्री ॥ ३५ ॥ अकचटतपयशावर्गाः खगेशमार्जारसिंहशुनाम् ॥ सर्पाखुमृगावीनां निजपंचमवैरिणामष्टौ ॥ ३६ ॥ राश्येक्ये चेद्भिन्नमृक्षं द्वयोः स्यान्नक्षत्रैक्ये राशियुग्मं तथैव ॥ नाडीदोषो नो गणानां च दोषो नक्षत्रैक्ये पादभेदे शुभं स्यात् ॥ ३७ ॥ सेव्याधमर्णा युवती नगरादिभं चेत्सर्वं हि भस्य धनिभर्तृपुरादिषड्भात् ॥ सेवाविनाशधननाशनभर्तृनाशग्रामादिसौख्यसहृदिदं क्रमशः प्रदिष्टं ॥ ३८ ॥ कुजशुक्रसौम्यशशिसूर्यचंद्रज्ञाः कविभौमजीवशनिसौरयोगुरुः ॥ इह राशिपाः क्रियमृगास्यतौलिकेंदुभतो नवांशविधिरुच्यते बुधैः ॥ ३९ ॥ समगृहमध्ये शशिरवि होरा विषमभमध्ये रविशशिनोः सा ॥ ४० ॥ शुक्रज्ञजीवशनिभूतनयस्य बाणा ५ पोला ७ ष्ट ८ पंच ५ विशिखाः ५ समराशिमध्ये ॥ त्रिंशांशका विषमभे विपरीतमस्य द्रेष्काणकाः प्रथमपंचनवाधिपानां ॥ ४१ ॥

सम	५	७	८	५	५	५	५	८	७	५	विषम
राशि	शु	बु	वृ	श	मं	मं	श	वृ	बु	शु	राशि

स्याद्द्वादशांश इह राशित एव गेहं होराद्दृक्कं नवमांशकसूर्यभागाः ॥ त्रिंशांशकश्च षडिमे कथितास्तु वर्गाः सौम्यैः शुभं भवति चाशुभमेव पापैः ॥ ४२ ॥ ज्येष्ठापौष्णभसार्पभांतघटिकायुग्मं च मूलाश्विनीपित्र्यादौ घटिकाद्वयं निगदितं तद्भस्य गंडांतकं ॥ कर्कालिस्वंडजभांततोर्द्धघटिकासिंहाश्वमेषादिगा पूर्णांते घटिकात्मकं त्वशुभदं नंदातिथेश्चादिगा ॥ ४३ ॥ लग्नात्पापावृजुश्चानृजू व्ययार्थस्थौ यदा तदा ॥ कर्तरी नाम सा ज्ञेया मृत्युदारिद्र्यशोकदा ॥ ४४ ॥ चंद्रे सूर्यादिसंयुक्ते दारिद्र्यं

आग्नेयं प्रथमं यस्य द्वितीयं जन्मभं भवेत् ॥ न ग्रामे वास ... ग्रामो यतः प्राणार्थनाशद इति ॥ ४ ॥ २०४

॥ गंडांतं नाम संधिविशेषः ॥ स चानेकविधः ॥ नक्षत्रतिथिलग्नसंधिः तथा योगकरणवर्षायनर्तुमासदिनरात्रिमध्यादिः प्रातः ॥ सायं निशीथसंधिश्चेति ॥ मानमुक्तं वशिष्ठेन ॥ पक्षोद्भवसंधिरिति दिनं मास संधिरिति नाड्यः खलु संध्ययोश्च ॥ ना ॥ उक्तं तस्यास्तिथिकरणयोगसंधिस्तद्वद्भूरस्य संधिः ॥ ३ ॥ एतत्परिहारो नारदेनोक्तः ॥ स्वोदये ग्रेस्वोच्चगेवा

मार्गपंक्तीसु

रामः


एतेषा शय: यदि प्रथमलग्नेसुतदा अंशप्रलग्ने दोषकृन्नास्त्वेवेत् ॥ यथासिंहात् मीन इत्यादि ॥ परिहारांतरमाहगुरुः ॥ लग्नादष्टमराशीशः केंद्रगः शुभवीक्षितः ॥ द दुष्टाष्टमलग्नोत्थं दोषमाशु व्यपोहति ॥१॥
रंध्रेशः स्वांशस्थस्तु गः स्वोच्चस्त्रमित्रगः ॥ अष्टमस्थानदोषोहि विनश्यतिन संशय इति ॥१५५२४

मरणं शुभं ॥ सौख्यं सापत्न्यवैराग्ये पापद्वययुते मृतिः ॥ ४५ ॥ जन्मलग्नभयोर्मृत्युराशौ नेष्टः करग्रहः ॥ एकाधिपत्ये राशी शमैत्रे वानैव दोषकृत् ॥ ४६ ॥ मीनो र्ण्स्ट्रदो२कर्को४लि८मृग१०स्त्रियो६ष्टमं लग्नं यदा नाष्टमजो हि दोषकृत् ॥ अन्योन्य मित्रत्वयुतेनसा वधूर्भवेत्सुतायुर्गृहसौख्यभाजिनी ॥ ४७ ॥ मृतिभवनां शे यदि च चिलग्ने तदधिपतिर्वा न शुभ करः स्यात् ॥ व्ययभवनं वा भवति तदंशास्तदधिपतिर्वा कलहकरः स्यात् ॥ ४८ ॥ खरामतोंऽत्याद्गितिवन्हिपित्र्यमेखवेदतः ४०करदतश्च कुसार्पभेखवाणा५० तोश्वेध्रुतितो १८र्यमांबुपेद्भते २० भगत्वाष्ट्रभजीववैश्वभे ॥ ४९ ॥ मनो १४ र्हिदैवानिलसौम्यपाक्षभेकुपक्ष२१ तः शेवकरेष्टितो १६ जमेयुगाम्बितो २४ बुध्नभतोयपाम्यभेखचंद्रतो १० स्मित्रभवासवश्रुतौ ॥ ५० ॥ मूलेंदु वाराणा५ द्विषनाडिकाः स्युस्ता ४ वर्ज्याः शुभेष्वो विषनाडिकाध्रुवाः ॥ निघ्नाभभो

अ	भ	कृ	रो	मृ	आ	पु	पु	श्ले	म	पू	उ	ह	चि	स्वा	वि	अ	ज्ये	मू	पू	उ	श्र	ध	श	पू	उ	रे	गोनरवतर्के६०
५०	२४	३०	४०	१४	२१	३०	२०	३२	३०	२०	१८	२१	२०	१४	१४	१०	१४	५६	२४	२०	१०	१०	१८	१६	२४	३०	भाजितास्फु


टाभवेयुर्विषनाडिकास्तथा ॥ ५१ ॥ गिरिशभुजगमित्राः पित्र्यवस्वंबुविश्वेऽभिजिदथचविधातापींद्रइंद्राननलोच ॥ निऋतिरदकनाथोप्यर्यमाथोभगाख्यः क्रमत इह मुहूर्त्ता वासरे चाराचंद्राः १५ ॥ ५२ ॥ शिवोजपादादष्टौ स्युर्भेशाश्चादितिजीवकौ ॥ विष्ण्वर्कत्वाष्ट्रमरुतो मुहूर्त्तानिशि कीर्तिताः ॥ ५३ ॥ रवावर्यमा ब्रह्मरक्षश्च सोमे कुजे वन्हिपित्र्ये बुधे चाभिजित्स्यात् ॥ गुरौ तोयरक्षो भृगौ ब्रह्मपित्र्ये शनावीशसर्पौ मुहूर्त्ता निषिद्धाः ॥ ५४ ॥ निर्वेधैः पाणिकरमूलमेत्रपित्र्यधा

॥ देयत्तम नोहरे तिथिवारयोरपि विषघटी रुक्ताः ॥ तिथिषु नागाद्रिशिखिषु वार्द्धयोगजाद्रिदिक्पावकविश्वनासवाः ॥ मुनीभसंख्याः प्रथमात्तिथेः क्रमात्स्युर्विषस्याद्घटिका चतुष्टयं ॥ नखाद्वयं द्वादशादिक्रमेला ॥
॥ वाराणाश्च तत्वानि २५ यथाक्रमेशा सूर्यादिवारेषु परं च तस्मान्नाड्यो विषस्याखलु वर्जनीयं ॥ परिहारमाह गुरुः ॥ चंद्रो विषघटीदोषं हंति केंद्रत्रिकोणगः ॥ लग्नं विनाशुभैर्दृष्टः केंद्रे वा लग्नपस्त ॥
॥ था ॥ विषनाड्युत्थितदोषं हंति सौम्यर्द्वगः शशी ॥ मित्रदृष्टोथवा स्वीयवर्गस्थो लग्नपोपिवा ॥४॥



अथ चरणवेधः सौम्यवेधपरः ॥ पादमेव शुभैर्विद्धं मशुभैरिह कृत्स्नतः ॥ कश्यपः ॥ क्रूरविद्धं युतं धिष्ण्यं क्रूराक्रांतं च कृत्स्नभं ॥ मरिष्ठे हि मनयं हम्यंभूता ॥
क्रांतमिव सजेत् ॥ श्रीपतिः ॥ वधूप्रवेशे च प्रदाने वरस्योपाणिपीडने ॥ वेधः पंचशलाकाख्ये ऽन्यत्र सप्तशलाकके ॥ गर्गः ॥ मघायाः प्रथमे पादे मू ॥
लस्य प्रथमे तथा ॥ रेवत्याश्च चतुर्थे च विवाहः प्राणनाशनः ॥ ४ ॥ कृत्रिमे विवाहे पि सप्तशलाकाचक्रे वेधो वर्ज्यः ॥ उक्तं स्कंदेपि ॥ कुभर्द्वे खिके
सप्तशलाकचक्रे एवं वेधः स्यात् ॥ यस्याः शशी सप्तशलाकभिन्नः पापैः शुभैः वा रथ वा विवाहे ॥ उद्वाहवस्त्रेण समं वृतांगी स्मशानभूमिं रुदती प्रयाती ति ॥ ५५

स्यात्सौम्येन्नरपवने शुभो विवाहः ॥ रिक्तामारहितितिथौ शुभेन्हि वैश्वप्रांत्यांघ्रिश्रुति-
तिथिभागतोभिजित्स्यात् ॥ ५५ ॥ वेधोन्योन्यमसौ विरंच्यभिजितोर्याम्यानुराधर्क्ष-
योर्विश्वेंद्वोर्हरिपित्र्ययोर्ग्रहकृतो हस्तोत्तराभाद्रयोः ॥ स्वातीवारुणयोर्भवेन्नि-
र्ऋतिभादित्योस्तथोफान्त्ययोः ॥ खेटे तत्र गते तुरीयचरणाद्योर्वा तृतीयद्वयोः
॥ ५६ ॥ इति पंचरेखावेधः ॥ अथ सप्तरेखावेधः ॥ शाक्रे ज्येष्ठान्नभानिलेजलशिवे
पौष्णार्यमर्क्षे वसुद्वीशे वैश्वसुधांशुभे हयभगे सार्पानुराधे तथा ॥ हस्तोपोत्तमभे विधा-
त्रविधिभे मूलादितीवाक्पभाज्ञो श्रीयाम्यमघे ह्यशानुहरिभे विद्धं कुभं द्वे खिके ॥ ५७ ॥
क्रूराक्रान्ताशिक्रूरविद्धानि क्रूरमुक्तादिकानि च ॥ भुक्ता चंद्रेण मुक्तानि शुभार्हाणि प्रचक्षते ॥ ५८ ॥ ज्ञाराहुपूर्णेंदुसिताः स्वपृष्ठे भं
सप्त ७ जो ९ जाति २२ शरै ५ र्मितं हि ॥ संलत्तयंतेऽर्कशनीज्यभौमाः सूर्या १२ ष्ट ८ तर्का ६ ग्नि ३ मितं पुरस्तात् ॥ ५९ ॥ इति ल-
त्ता ॥ हर्षेशलवेधृतिसाध्यव्यतीपातकगंडशूलयोगानां ॥ अन्त्ये यन्नक्षत्रं पातेन निपातितं स्यात् ॥ ६० ॥ इति पातः ॥ पंचास्या ५
जौ १ गो २ मृगौ १० तौलि ७ कुंभौ ११ कन्या ६ मीनौ १२ कर्क्य ४ ली ८ चाप ९ नृयुग्मे ३ ॥ तत्रान्योन्यं चंद्रभान्वोर्निरुक्तं क्रांतेः सा-
म्यं नो शुभं मंगलेषु ॥ ६१ ॥ इति क्रांतिः ॥




व्याघातगंडव्यतिपातपूर्वे शूलांत्यवज्रे परिघातिगंडे ॥ योगे विरु-
द्धे त्वभिजित्समेतः खार्जूरमर्क्षं द्विषमे र्क्षीचेत् ॥ ६२ ॥ इत्येकार्गलः ॥ वारा५ष्ट८दिक्१०शराष्टन

विष्कुंभः

तत्र ४

तहो वक्र ला न क्रमेण गणनाय या प्रियांशुराहुः राशीन् सह हंति ॥ ८ ॥

॥दशायोगमहाचक्रे प्रमादाद्यदि विध्यते ॥ क्रूरसौम्यमहैर्यो पि दंपत्योरेकनाशनमिति ॥ दशायोगः प्रवादमाह भरद्वाजः ॥ गुरौ लग्नाधिपे युक्ते सवीर्ये ॥ लग्नकेंद्रगे ॥ दशायोगा विनश्यंति यथाग्नौ तूलराशयः ॥ व्यासः ॥ गुरुणा भृगुणा वापि संयुतं दृष्टमेव च ॥ दशायोगसमायुक्तमपि लग्नं शुभावहं ॥ ॥१२॥ केचिद्विवाहे वज्रयोगं निविद्धमाहुस्तल्लक्षणं ॥ तिथिवारर्क्षवनं नवभिश्च समन्वितं ॥ सप्तभिश्च हरेद्भागं शेषांके फलमादिशेत् ॥ त्रिशे ॥ ॥शेषेतु जलं विंद्यात् संचयो क्षेमभंजनः ॥ सप्तशेषे वज्रपातो ज्ञेयं वज्रस्य लक्षणमिति ॥ ॥वारे शे... [illegible]



गा ७ तिथ्यं त्य ९९ स्तिथि ९५ र्क्षतिथ्य १८ प्रकृतेः पंच २१।२२।२३।२४।२५॥ उपग्रहाः स्युर्भमतो ज्ञेताराः स्युर्भानदेशे कुरवालिकानां ॥६४॥ **इत्युपग्रहः** ॥ पातोपग्रहलत्तास्तु नेष्टोब्दिः खेटपस्वर्भैः ॥ वारस्थिः प्रोष्ठभिस्तस्थः से क्रस्यात्खर्द्धयामकः ॥६५॥ पाक्का १४ र्क १२ दि १० ज्व सुट र साद्र्द्धयाध्विनः २ कुलिकाख्ये ॥ राच्चौ निरेकाभिस्त्यंश्रा: शानौ चान्त्यो पि निंदितः ॥६५॥ चापां त्यगे १२ गो २ हे १९ गे पतंगे कर्कोध जगे १ स्त्री ह मिथुन २ स्थिते च ॥ सिंहापलिगे ८ नक्रे १० घटे ७ समाः स्युस्तिथ्यो द्वितीयाप्रमुखाश्च दग्धाः ॥६६॥ लग्नाच्चंद्रान्मदन ७ भवनगे खेटे नस्यादिह परिणायनं ॥ किंवा वाराणा ५ गु ५ मितलग्नगे यामित्रं स्याद्शुभकरमिदं ॥६७॥ **इति वेधः** ॥ एकार्गलोपग्रहपातलत्तायामित्रकर्त्तर्युदयास्तदोषाः ॥ नश्यंति चंद्रार्कबलोपपन्ने लग्ने यथार्कोभ्युदये तु दोषा ॥६८॥ उपग्रहर्क्षं कुरवाल्लिकेषु कुलिंगवंगेषु च पातितं भं ॥ सौराष्ट्रशाल्वेषु च लत्तितं भं त्यजेत्तु विद्धं किल सर्वदेशे ॥६९॥ स्यात् सूर्यर्क्षयुते भे प्रोष्ठे २७ खं २७ भूयुगांश्च जानिह्नस्यो १० वा ९९ तिथ्यः २५ ॥ नागेंदवो १८ के दुमिता १९ नखा २० श्च दुर्वंति चेतद्दशायोगसंज्ञाः ॥७०॥ वाताभ्राग्निमहीपचोरमरणं रुग्वज्रवादौ ... तिर्यग्गांकेदलिते समे मनु १४ युते चोजे तु सैके द्विते ॥ मंदास्यादथ संमितास्तु मनु १४ भी रेखाः क्रमात्संलिखेद् द्धोस्मिन् ग्रहेंद्वोर्नशुभदः स्यादेक रेखास्थयोः ॥७१॥

॥उपग्रहे पातेयस्मिन्यायेरविः स्यात्सम संख्य एवं नक्षत्र चरणो वर्ज्यः ॥ लत्तायां लत्ताकारी यस्मिन् चरणोत्तत्सम संख्य एव वर्ज्यो नान्यः उक्तं ॥ उपग्रहे कुलत्तायां तथा चंडायुधाह्वये ॥ ग्रहोस्ति यस्य भांशे विद्धोंशस्तत्समः ॥ ॥यामित्रपरिहारः व्यवहारोच्चये ॥ स्वोच्चे स्ववास्वभवनेस्फुरदंशुजालः सौम्यालये हितगृहे शुभवर्गगे वा ॥ यामित्रकादिपरिसंचित दोषराशिं हत्वा ददाति विधुराः सुखमेव चंद्रः ॥ ॥ ॥देशविशेषे दोषपरिहारः ॥ लत्तामालवके देशे पातः कोशलकेतथा ॥ एकार्गलं तु काश्मीरे वेधं सर्वत्र वर्जयेत् ॥ युतिदोषो भवेद् गौडे यामित्रस्य च यामुने ॥ वेधदोषस्तु विंध्याख्ये देशे नान्येषु केचनेति ॥४॥

निधनं प्रहरार्द्धेतु निःस्वं यमघंटके ॥ कुलिके सर्वनाशः स्यात्... नदी बदा ॥३॥

॥राकः ॥१०॥

नं२

१६६

सू	चं	मं	बु	बृ	शु	श	ग्रहाणां दृष्टिर्ज्ञेया ॥७५
३।१०	३।१०	७	३।१०	४।८	३।१०	९।५	१
९।५	९।५	३।१०	९।५	७	९।५	४।८	२
४।८	४।८	९।५	४।८	३।१०	४।८	७	३
७	७	४।८	७	९।५	७	३।१०	४

(उत्क्रमपक्षात्)

लग्नेनाढ्योपाततिथ्योंकऽ९ तष्टाः शेषे नागा ८ द्य ७ ब्धि ४ धतर्केष्व ६ दु १ संख्ये रोगोवन्हीराजचौरौ च मृत्युर्बाणश्चायं दाक्षिणात्यप्रसिद्धः ॥७२॥ रसगुणशशिनागाब्ध्याढ्यसंक्रांतियातांशकमितिरथ तष्टांकै ९ र्यदा पंचशेषाः ॥ रुगनलनृपचौरा मृत्युसंज्ञश्च बाणो नवहृतशरशेषे शेषकैक्ये सशल्यः ॥७३॥ रात्रौ चौररुजौ दिवा नरपतिर्वन्हिः (दिवारात्रौ) सदा संध्ययोर्मृत्युश्चाथ शनौ नृपो विदि मृतिर्भौमेग्निचौरौ रवौ ॥ रोगोथ व्रतगेहगोपनृपसेवायानपाणिग्रहे वर्ज्याश्च क्रमतो बुधैरुगनलक्ष्मापालचौरा मृतिः (एते पंच्यो) ॥७४॥ त्र्याद्यं ३।१० त्रिकोणां ९।५ चतुरस्र ४।८ मस्तं ७ पश्यंति खेटाश्चरणाभिवृद्ध्या ॥ मंदो गुरुर्भूमिसुतः परे च क्रमेण संपूर्णदृशो भवंति ॥७५॥ यदा लग्नांशेशो लवमथ तनुं पश्यति युतो भवेद्वायं वोढुः शुभफलमनल्पं रचयति ॥ लवद्यून ७ स्वामी लवमदनभं ७ लग्नमदनं प्रपश्येद्वा वध्वाः शुभमितरथा ज्ञेयमशुभं ॥७६॥ लवेशो लवं लग्नपो लग्नगेहं प्रपश्येन्मिथो वाशुभं स्याद्वरस्य ॥ लवद्यून ७ पोंशं द्युनं ७ द्यूनपो स्तं मिथो वेक्षते स्याच्छुभं कन्यकायाः ॥७७॥ लवपतिशुभमित्रे वीक्षतेंशं तनुं वा परिणयनकरस्य स्याच्छुभं प्राप्तदृष्टे ॥ मदनलवपमित्रं सौम्यमंशं द्युनं वा तनुमदनगृहं चेद्वीक्षते वामवध्वाः ॥७८॥ विषुवायनेषु परपूर्वमध्यमान्दिवसांस्त्यजेदितरसंक्रमे बुधः ॥ घटिकास्तु षोडश शुभक्रियाविधौ परतोपि पूर्वमपि संत्यजेद् बुधः ॥७९॥ देव ३३ ग्नि ३ ष्वं ५ कै ९ स्तयोद्धृष्टाष्टो ८ नाड्योंशाः २ रखनृपाः १६० क्रमात् ॥

यातिप्रागागतातिशेषा निर्तिवामैवेवनवर्द्ध ते पश्चात् पंचशेषेसतिस शल्यः वाणः ३×

बुधसंक्रमे स...

(सप्तमस्वामी)

नवमांशात् सप्तमस्वामी अंशं द्यूनं अंशसप्तमराशिं पश्येत् ॥ द्यूनपः लग्नात् सप्तमं पश्येत् सप्तमांशं ईक्षते तदा कन्यायाः शुभं ॥४×

विषुवं तुलामेषसंक्रांती अयने कर्कमकरसंक्रांती च तस्य बुसंक्रांतिषु ॥ स्वस्वेशेनोदयास्तासौ वीक्षितौ वाथ संयुतौ ॥ लग्नंवास्तग्रहं तत्र दंशेशेनेक्षितं युतं ॥६×

गुरुः ॥ अयने विषुवे पूर्वं परं मध्यं दिनं त्यजेत् ॥ अन्यसंक्रमणे पूर्वाः पराः षोडश नाडिकाः इति ॥१॥२×

अथ स्वनवमांशेपि पापग्रहे लग्ने धनुर्नवमांशो गंतिमः इ... विधेवि... कान्यान्यत्र... ॥

परंतु वर्गोत्तमं तंतिमं नवमांशं ... वा ... हुत्वा... ॥ यथा मिथुन लग्ने मिथुन नवमांशो ... ॥ ५ ॥

य... दोषा नाशं प्रयुस्तदा ॥ वर्गोत्तमगते लग्ने सर्वे दोषा लयं ययुः ॥

... ॥ १२४

वर्ज्याः संक्रमणे रोर्कोदेः प्रायोर्कस्यातिनिंदिताः ॥८०॥ बधिरेतुला७ली८ बधिरो मृगा१०श्वो९ रात्रौ च सिंहा५ज१वृषा२
दिवांधाः ॥ कन्या६नृयुक्३कर्कटका४धनिशांधा दिने घटो११ऽत्यो१२निशि पंगुसंज्ञः ॥८१॥ दारिद्र्यं बधिरतनो
दिवांधलग्ने वैधव्यं शिशुमरणं निशांधलग्ने ॥ पंग्वंगे निखिलधनानि नाशमीयुः सर्वत्राधिपगुरुदृष्टिभिर्न
दोषः ॥८२॥ कार्मुकस्तौलिक७कन्या६युग्म३लवे झषगे१२वा ॥ यर्हि भवेदुपयामस्तर्हि सती खलु कन्या ॥८३॥
अंत्यनवांशोन च परिणेया काचन वर्गोत्तममिह हित्वा ॥ नो चरलग्ने चरलवयोगं तौलिमृगस्थेप्राप्राभृतिकु
र्यात् ॥८४॥ व्यये१२शनिः खे१०वनिजस्तृतीये३भृगुस्तनौ चंद्रखला न शस्ताः ॥ लग्नेट्कविग्लौश्चरिपौ६
मृतौ८ग्लौ लग्नेट्शुभाराश्च मदे७ च सर्वे ॥८५॥ त्र्या३या११ष्ट८षट्६सु रविकेतुतमोर्कपुत्रास्त्र्या३या११रि
६गाः क्षितिसुतो द्वि२गुरा११य११गोज्ञः ॥ सप्त७व्यया१२ष्ट८रहितौ ज्ञगुरू सितोष्ट८त्रि३द्यून७षट्६व्यय१२
८हान्परिहृत्य शस्तः ॥८६॥ पापौ कर्तरिकारकौ रिपुगृहे नीचेस्तगौ कर्तरी दोषो नैव सितेरिनीचगृहगे तस्य
ष्ट दोषोपि न ॥ भौमेस्तेरिपुनीचगे न हि भवेद्भौमोष्टमो दोषकृन्नीचे नीचनवांशके शशिनि रिःफा१२ष्टा८रिदो
दोषोपि न ॥८७॥ प्रद्धापनर्तु तिथिमासभपक्षदग्धातिथ्यंधकाणबधिरांगमुखाश्च दोषाः ॥ नश्यंति विद्गुरु
सिते ष्विह केंद्रकोणे तद्वच्च पापविधुयुक्तनवांशदोषाः ॥८८॥ केंद्रे कोणे जीव आये११रवौ वा लग्ने चंद्रे वापि

तौलिमृगस्थे चंद्रे सति ... वर्गोत्तम नवमांशं ... कुर्यात् ॥ १२५

अस्तो नाम ... मेरु

सक्रूरराशेरथ भोनवांशः ... विलग्नसंस्थः ॥

त्रिकोणे केंद्रे बुधगुरुः सितौ च यत्र तत्र ... ॥ १२५ ॥

गुरुः केंद्रकोणेपि केंद्रस्थः ... बुधः ॥ तेरः ... ॥ १ ॥ २४

लग्ने ... केंद्रे ... ॥

सप्तमराशि ... जीवे सति १

मु०चिं०

॥ २२ ॥

वर्गोत्तमे वा ॥ सर्वे दोषा नाशमायांति चंद्रे लाभे तद्वद्दुर्मुहूर्तांशदोषाः ॥ ८९ ॥ त्रिकोणे केंद्रे वा मदनरहिते दोषशतकं हरेत्
सौम्यः शुक्रो द्विगुणमपि लक्षं सुरगुरुः ॥ भवेदाये केन्द्रेऽङ्गप उत लवेशो यदि तदा समूहं दोषाणां दहन इव तूलं शमय
ति ॥ ९० ॥ द्वौ द्वौ ज्ञभृग्वोः पंचेंदौ रवौ सार्द्धत्रयो गुरौ ॥ रामा मंदागुकेत्वारे सार्द्धैकैकविशोपकाः ॥ ९१ ॥ व्ययभूः सितोर्कः
ष्वसुरस्तनुस्तनुर्यामित्रपः स्याद्यदि तो मनः प्रापी ॥ एतद्बलं संप्रतिभाव्य तांत्रिकस्तेषां सुखं संप्रवदेद्वियाहतः ॥ ९२ ॥
द्वस्ने पद्वे सौरिकुजार्कोपि च वारे वर्ज्ये नक्षत्रे यदि वा स्यात्क्रूरपीडा ॥ संक्रांतर्नो नांतर्हि सुतायुर्धनलाभप्रीतिप्राप्त्यै
सा भवतीह स्थितिरेषा ॥ ९३ ॥ गांधर्वादिविवाहेर्काद्दृदशनेत्र १२ गुरोर्देव ३३ ॥ कु ४ युगां ४ धगा ५ द्विजि ८ भू १ रामा ३ स्त्रिप
धा मश्रुभाश्रुभाः ॥ ९४ ॥ विधोर्बलमवीक्ष्यैव दलनं कंडनं वारकं गृहं गरम विभूषणान्यथ च वेदिकामंडपान् ॥
विवाहविहितोडुभिर्विरचयेत्तथोद्वाहतो न पूर्वमिदमाचरेत्रिरसनवर्षमिते द्वासरे ॥ ९५ ॥ हस्तोच्छ्राया वेदह
स्तैः समंतात्तुल्या वेदी वेश्मनो वामभागे ॥ युग्मे वर्षे षड्विहीने च पंचसप्ताहे स्यान्मंडपोद्वासनं सत् ॥ ९६ ॥ सूर्येंगना
सिंहघटेषु शैवे स्तंभोलिकोदंडमृगेषु वायो ॥ मीनाजकुंभे निर्ऋते नो विवाहे स्यात्प्रोग्निकोणे वृषयुग्मकर्के ॥ ९७ ॥
नास्यामृक्षं न तिथिकरणं नैव लग्नस्य चिंता नो वा वारो न च लवविधिर्नो मुहूर्तस्य चर्चा ॥ नो वा योगो न मृतिभव
नं नापि यामित्रदोषो गोधूलिस्सा मुनिभिरुदिता सर्वकार्येषु शस्ता ॥ ९८ ॥ पिंडीभूते दिनकृति हेमंतर्तौ स्यादर्द्धा

॥ रामः ॥

॥ २२ ॥

[illegible] गोधूलिः शुभः स्यात् ॥ [illegible] ॥ १४

[illegible] ॥ १०४ ॥ सायनांशो [illegible]

[illegible]

स्तेतपसमयेगोधूलिः ॥ संपूर्णोस्ते जलधरमालाकाले त्रेधा योज्या सकलशुभे साप्यींदौ ॥ ९९ ॥ अस्तं याते गुरुदिवसे सौ-
रे सार्के लग्नान्मृत्यौ ८ रिपुभवने ६ लग्ने चेंदौ ॥ कन्यानाशस्तनुमदमृत्युस्थे भौमे वोढुर्लाभे ११ धन २ सहजे ३ चंद्रे
सौख्यं ॥ १०० ॥ मेषादिगेर्के षुशराः ५८ स्वगाक्षाः ५७ स्तत्रेषव ५७ स्तत्र शराः ५७ गजाक्षाः ५८ ॥ गोक्षाः ५९ खतर्काः
६० कुरसाः ६१ कुतर्काः ६१ कुंगानि ६१ षष्टि ६० र्नवपंच ५९ भुक्तिः

मे	वृ	मि	क	सिं	क	तु	वृ	ध	म	कुं	मी	संक्रांतिगतिफलम्
५८	५७	५७	५७	५८	५२	६०	६१	६१	६१	६०	५९	

॥ १०१ ॥ संक्रांतियातघस्राघ्ने गतिर्निघ्नाः खषट् ६० हृताः ॥ लब्धे-
नांशादिना योज्यं यातं तदर्के स्पष्टभास्करः ॥ १०२ ॥ तनोरिष्टांशपाकांशसूर्वेन वांशाद्यासंगुणाः ॥ रामाश्वालब्धमेषाद्यं
तनोर्वर्गादिसाधने ॥ १०३ ॥ अर्काल्लग्नात्सायनाद्भोग्यभुक्तौ भोगैर्निघ्नौ स्वोदयात्खाग्नि ३० भक्तौ ॥ भोग्यं भु-
क्तं चांतरालोदयाढ्यं यस्मात्भक्तं स्वेष्टनाड्यो भवेयुः ॥ १०४ ॥ चेल्लग्नार्कौ सायनावेकराशौ तद्विश्लेषघ्नोदयः खा-
ग्नि भक्तः ॥ स्वेष्टः कालो लग्नमूनं यदार्को द्रात्रेश्च्रो योर्कोस्मिन् षड्भान्निशायां ॥ १०५ ॥ उत्पातान्सहपातदग्धतिथि-
भिर्दुष्टांश्चयोगांस्तथा चंद्रेज्योशनसामथास्तमयनं तिष्याः क्षयर्द्धी तथा ॥ गंडांतं सविष्टि संक्रमदिनं तन्वंशपा-
स्तं तथा तन्वंशेशविधूनथाष्ट ८ रिपु ६ द्युगान्पापस्य वर्गांस्तथा ॥ १०६ ॥ सेंदुक्रूरखगोदयांशमुदयास्ताशुद्धिं चंडायु-
धाभूखार्जूरं दग्धयोगयोगसहितं यामित्रलत्तान्वधं ॥ वाणोपग्रहपापकर्तरितथा तिथ्यृक्षवारोत्थितं दुष्टं यो-

[illegible]

॥ मु॰ चिं॰ ॥

॥ २३ ॥

गमथाद्ध्यामकुलिशाद्यान्वारदोषानपि ॥ १०७ ॥ क्रूराक्रांतविमुक्तभं ग्रहराभं क्रूरस्य गंतव्यभं त्रेधोत्पातहतं च केतुहतभं संध्योदितं भं तथा ॥ तद्वच्च ग्रहभिन्नयुद्धगतभं सर्वानिमान्संत्यजेदुद्वाहे शुभकर्म्मसु ग्रहकृतान्लग्नस्य दोषानपि ॥ १०८ ॥ श्रीः ॥ इति श्रीदैवज्ञानंतसुतदैवज्ञरामविरचिते मुहूर्त्तचिंतामणौ विवाहप्रकरणम् ॥ ६ ॥ ॥ ॥ ॥ ॥ ॥ ॥ समाद्वि ७ पंचा ५ ङ्क ९ दिने विवाहाद्वधूप्रवेशोष्टि १६ दिनांतराले ॥ शुभः परस्ताद्विषमाब्दमासदिने ऽक्षपञ्चाब्दपरतोऽपि पश्चात्तु यथेष्टं ॥ १ ॥ ध्रुवक्षिप्रमृदुश्रोत्रवसुमूलमघानिले वधूप्रवेशः सन्नेष्टो रिक्तारार्के बुधे परैः ॥ २ ॥ ज्येष्ठे पतिज्येष्ठमथाधिके पतिं हंत्यादिमे भर्तृगृहे वधूः शुचौ ॥ श्वश्रूं सहस्ये श्वशुरं क्षये तनुं तातं मधौ तातगृहे विवाहतः ॥ ३ ॥ श्रीः ॥ इति श्रीदैवज्ञानंतसुतदैवज्ञरामविरचिते मुहूर्त्तचिंतामणौ वधूप्रवेशप्रकरणम् ॥ ७ ॥ ॥ ॥ ॥ ॥ ॥ चरेदथोजहायने घटा ११ लि ८ मेष १ गोरवौ रवीज्यशुद्धियोगतः शुभग्रहस्य वासरे ॥ नृयुग्म ३ मीन १२ कन्यका ६ तुला ७ वृषे २ विलग्नके द्विरागमं लघुध्रुवे चरे ऽस्त्रपे मृदूडुनि ॥ १ ॥ दैत्येज्यो ह्यभिमुखदक्षिणे यदि स्यात्गच्छेयुर्नहि शिशुगर्भिणीनवोढाः ॥ बालश्चेद्व्रजति विपद्यते नवोढा स्याद्वंध्या भवति च गर्भिणी त्वगर्भा ॥ २ ॥ नगरप्रवेशविषयाद्युपद्रवे करपीडने विबुधतीर्थयात्रयोः ॥ नृपपीडने नववधूप्रवेशने प्रतिभार्गवो भवति दोषकृन्न हि ॥ ३ ॥ पितुर्गे

प्रतिकूलशुक्रः सन्मुखदक्षिणशुक्रः
देवाविषयोत्पवर्त्तनमित्यमरः ॥ २

॥ रामः ॥

॥ २३ ॥

सौमसौम्यगुरुशुक्रवासराः सर्वकर्मसु शुभप्रदा मताः ॥ भानुभौमसुतमंदवासरे शुभप्रोक्तमेव खलु कर्म सिध्यति ॥

रिक्ते चेत्कुचपुष्पसंभवस्तदा न दोषः प्रतिशुक्रसंभवः ॥ भृग्वंगिरोवत्सवसिष्ठकश्यपात्रीणां भरद्वाजमुनेः कुले
तथा ॥ ४ ॥ श्रीः ॥ इति श्रीदैवज्ञानंतसुतदैवज्ञरामविरचिते मुहूर्त्तचिंतामणौ द्विरागमनप्रकरणम् ॥ ८ ॥
स्यादग्निहोत्रविधिरुत्तरगे दिनेशे मिश्रध्रुवान्त्यशशिशाक्रसुरेज्यधिष्ण्ये ॥ रिक्तासु नो कुजशशीज्यभृगौ न नीचे
नास्तंगते न विजिते न च शत्रुगेहे ॥ १ ॥ नो कर्कनक्रझषकुंभनवांशलग्ने नो द्व्यंगते नौ रविशशीज्यकुजे त्रिकोणे ॥
केंद्रद्वषट्त्रिभवगे च परैस्त्रिलाभषट्खस्थिते निधनशुद्धियुते विलग्ने ॥ २ ॥ चापे जीवे तनुस्थे वा मेषे भौमे व
रेद्युने ॥ षट्त्र्याये ज्ञे रवौ वा स्यादाज्ञातोऽग्निर्यजति ध्रुवं ॥ ३ ॥ श्रीः ॥ इति श्रीदैवज्ञानंतसुतदैवज्ञरामवि
रचिते मुहूर्त्तचिंतामणौ अग्न्याधानप्रकरणम् ॥ ९ ॥ ॥ राज्ञाभिषेकः शुभ उत्तरायणे गुर्विंदुशुक्रैरुदितैर्व
लान्वितैः ॥ भौमार्कलग्नेशदशेशजन्मपैर्नो चैत्ररिक्तारनिशामलिम्लुचे ॥ १ ॥ शाक्रश्रवःक्षिप्रमृदुध्रुवोडुभि
र्धीशीर्षहृद्येऽथवोपचये शुभे तनौ ॥ पापैस्त्रिषष्ठायगतैः शुभग्रहैः केंद्रत्रिकोणायधनत्रिसंस्थितैः ॥ २ ॥ पापैस्तनौ
रुङ्निधने मृतिः सुते पुत्रार्त्तिरर्थव्ययगैर्दरिद्रता ॥ स्यात्खे लसो भ्रष्टपदो द्युनांबुगैः सर्वं शुभं केंद्रगतैः शु
भग्रहैः ॥ ३ ॥ गुरुर्लग्नकोणे कुजोऽरैः सितः खे स राज्ञा सदा मोदते राज्यलक्ष्म्या ॥ तृतीयायगौ सौरिसूर्यौ
खबंध्वोर्गुरुः खेऽब्जशुक्रौ त्रिरीः स्थिरा स्यान्नृपस्य ॥ ४ ॥ श्रीः ॥ इति श्रीदैवज्ञानंतसुतदैवज्ञरामविरचिते मुहूर्त्त

१० ४

ध्रुवं
निश्चयेन यजति यज्ञं कुरुते

४ ॥ मेषसिंहधन्वसाराः सध त्रिमकरशरावलाद्वेया ॥ प्रष्ठोदया मिथुनाः शिरसा मे शुभयंतो मीनः ॥

मे	वृ	मि	क	ध	म	नपावलाः
मि	वृ	क	ध	म	०	पृष्ठोदयाः
मि	सिं	क	तु	वृ	कुं	शीर्षोदयाः
०	०	०	०	०	मी	पार्श्वोदयः

गोऽन्त्याश्विर्कर्ककेमिथुना समृगा निशाख्याः पृष्ठोदया विमिथुनाः कथितास्त एव। शीर्षोदया दिनबलाश्च भवंति शेषा लग्नं समेत्य भयतः पृथुरोमयुग्मं॥

लग्नशकुनकारयोः २

न्वितामृगोरोराज्याभिषेकप्रकरणम्॥१०॥ ॥अथयात्राप्रकरणम्॥ यात्रायांप्रविदितजन्मनां नृपाणां दातव्यंदिवसमृदुक्तजन्मनां च॥ प्रश्नाद्यैरुदयनिमित्तमूलभूतैर्विज्ञाते शुभसमये बुधःप्रदद्यात्॥१॥ जननराशितनू यदिलग्नगे तदधिपौ यदिवा तनुएव वा॥ चरिपुखौ यगृहं यदिचोदयो विजयएव भवेद्वसुधापतेः॥२॥ रिपुजन्मलग्नभमथाधिपौ तयोस्तनएव चोपचयेस[illegible]चेद्भवेत्॥ हिबुकेषु नेष्टशुभवर्गकस्तनो यदि मस्तकोदयगृहं तदा जयः॥३॥ यदि प्रश्नतनौ वसुधारसचिराशुभवस्तु यदि श्रुतिदर्शनगं॥ यदि प्रश्नकृतिश्चापदस्तशुभग्रहदृष्टयुतं तु चरलग्नमपि॥४॥ विधुकुजयुतलग्ने सौरिदृष्टेऽथवा दुर्मतिभमदनसंस्थे लग्नगे भास्करेपि॥ हिबुकनिधनलोरोघ्ननगेवापि पापेसपदिभवतिभंगः प्रश्नकर्तुस्तदानीं॥५॥ त्रिकोणगो कुजास्सौरिशुक्रज्ञजीवायदैकोपिवा नोगमोकोच्छयुक्तो वा॥ बलीयांस्तु मध्येतयोर्योग्रहःस्यात्स्वकीयां दिशं प्रत्युतासौ नयेच्च॥६॥ प्रश्नेगम्यादिशीशास्खेटः पंचमगोयः॥ वोभूयाद्बलयुक्तः स्वामासांनयतेसौ॥७॥ धनुर्मेषसिंहेषु यात्राप्रशस्ता प्रशस्तानिज्ञोशनोराशिजे चैव मध्या॥ रयोकर्कमीनालिसंस्थेतिदीर्घा जनुःपंचसप्तत्रितारा श्चनेष्टाः॥८॥ नषष्ठीनचद्वादशीनाष्टमीनोसिताद्या तिथिः पूर्णिमाऽमानरिक्ता॥ हयादित्यमित्रेंदुजीवांत्यहस्तश्रवोवासवैरेव यात्रा प्रशस्ता॥९॥ नपूर्वदिशिशक्रभेनविधुसौरिवारेतथा नचाऽजपदभेगुरोर्यदिशासुशुक्रार्कयोः॥ नपाशिदिशिधा

म

॥अंतस्यदिकूपतिप्रजिवंधयकृत्तहयोः॥

त्र भे कुजबुधेर्यमर्क्षे तथा न सोम्यककुभि यज्ञे स्वजनयज्जीवितार्थी विबुधः ॥१०॥ पूर्वाह्ने ध्रुवमिश्रभे नृपतेर्यात्रान
मध्याह्नके तीक्ष्णाख्येऽपराह्णके न लघुभे नो पूर्वरात्रे तथा
मैत्राख्ये नैव मध्यरात्रसमये चोग्रे तथा नो चरे रात्र्यंते हरिह
स्तपुष्याश्विभिः स्यात्सर्वकाले शुभा ॥११॥ पूर्वाग्निपित्र्यांत ॥

पूर्वाह्ने	मध्याह्ने	अपराह्ने ॥	पूर्वरात्रे ॥	मध्यरात्रे ॥	अपररात्रे ॥
उ०उ०उ०रो० वि०ह००	म०ज्ये०आ० श्ले०	ह०अश्वि० पुष्य०अभि०	म०रे०चि० अनु०	पू०पू०पू० भ०म०	स्वा०पुन०श्र० ध०श०

पू०३	ह०	म०	भ०	स्वा०	वि०	ज्ये०	श्ले
१६	२१	११	७	१४	१४	१४	१४

कतारकाणां भूपैर्कविंशो २१ प्रा११ तुरङ्गमाः ७ स्युः ॥ स्वातीविशाखेंद्रभुजङ्गमानां नाड्यो निषिद्धा मनु१४संमिता
श्च ॥१२॥ पूर्वार्द्धमाग्नेयमघानिलानां त्यज्येद्धि चित्राहियमोत्तरार्द्धं ॥ नृपः समस्तांगमनेन यायी स्वातीम
घोत्तपानसोमतेन ॥१३॥ तमोभुक्तताराः स्मृता विंश२३ संख्या ध्रुवभोजीवपक्षो मृतश्चापि भोग्याः ॥ तदाक्रा
तभं कर्त्तरीसंज्ञमुक्तं ततो द्वेंदु२१ संख्यं भवेद्धूम्रनाम ॥१४॥ मार्त्तंडे मृतपक्षगे हिमकरश्चेज्जीवपक्षे शुभाया
त्रास्याद्विपरीतगे त्वयकरी द्वौ जीवपक्षे शुभा ॥ अस्तर्क्षे मृतपक्षतः शुभकरं यस्तान्तथा कर्त्तरीयापि नेंदुः स्थिति
मान्न विजयकरौ तौ द्वौ तयोर्जीवगो ॥१५॥ स्वात्यंतकाहिवसुपौष्णकरानुधादित्यध्रुवा रिविषमास्तिथयो
१।३।५।७।९।११।१३।१५ कुलाः स्युः ॥ सूर्येंदुमंदगुरवश्च कुलाकुलाख्यो मूलांबुपेशविधिभं दशा१० षट्ट्ह
द्वि२तिथ्यः ॥१६॥ पूर्वोश्वीज्यमघेंदुकराद्रनद्वीशेंद्रचित्रास्तथा पुष्करोकुलसंज्ञकाश्च तिथ[illegible]र्के१२

न्द्रा४ष८८वेदै४र्मिताः॥ यायीस्यादकुलेजयीचसमरेस्थायीचतद्वत्कुलेसंधिः स्यादुभयोःकुलाकुलगतोभूमीपयो
र्युद्धतोः॥१७॥ स्पुर्द्धमेंदस्रपुष्योरजवसुजलप
द्वीशमेत्रान्त्यपार्थयाम्याजांद्रींदुकर्णादितिपि
त्र्यपवनोदून्यथोभानिकामे॥ वन्त्यार्द्रावुध्नवि
त्रानिऋतिविधिभगाख्यानिमोक्षेपरोहिरापा
र्यमार्ग्यांदुविष्णान्तिमभदिन
करक्षोशिपष्याद्वितहो॥१८॥
धर्मगेभास्करेवित्तमोक्षेपाक्षी
वित्तगेधर्ममोक्षस्थितःशस्यते
कामगेधर्ममोक्षार्थगःशोभ
नोमोक्षगेकेवलंधर्मगःप्रोच्य
ते॥१९॥ अथतिथिचक्रम्॥

अकुल॥	कुलाकुल	कुल	धर्म	अर्थ	काम	मोक्ष
स्वा० भ० पू०षा० ध० रे० ह० अनु० पुन० उ० उ०भा०	मू० श्र० आ० अभि ० ० ०	कृ० पू० पू०अश्वि० पुष्य० मृ० म० श्र० ज्ये० वि० उ० चि०	अश्वि० पुष्य० श्ले० ध० श्रा० वि० अनु०	भ० पू० भा० ज्ये० श्र० पुन० म० स्वा०	कृ० आ०॥ उ० भा० वि० मू० अभि०	रो० उ० फा० पू० षा मृग० उषा० रेव० हस्त० ०
१।३।५।७।९।११ १३।१५ र० चं० श० गु०	१०।६।२ बुधः	८।४।१४।८।४ शुक्र० मंगल	० ० ० ०	० ० ०	पू० फा०	० ० ०

पौ०	मा०	फा०	चै०	वै०	ज्ये०	आ०	श्रा०	भा०	आ०	का०	मा०	०	पूर्व	दक्षिण	पश्चिम	उत्तर
१	२	३	४	५	६	७	८	९	१०	११	१२	०	सौख्यं	क्लेशः	भीतिः	अर्थागमः
२	३	४	५	६	७	८	९	१०	११	१२	१	०	शून्यं	नैःस्वं	निःस्वता	मिश्रफलं
३	४	५	६	७	८	९	१०	११	१२	१	२	०	द्रव्यक्लेशः	दुःखम्	इष्टाप्तिः	धनम्
४	५	६	७	८	९	१०	११	१२	१	२	३	०	लाभः	सौख्यम्	मंगलम्	वित्तलाभः
५	६	७	८	९	१०	११	१२	१	२	३	४	०	लाभः	द्रव्याप्तिः	धनम्	सौख्यम्
६	७	८	९	१०	११	१२	१	२	३	४	५	०	भीतिः	लाभः	मृत्युः	अर्थागमः
७	८	९	१०	११	१२	१	२	३	४	५	६	०	लाभः	कष्टम्	द्रव्यलाभः	दुःखं
८	९	१०	११	१२	१	२	३	४	५	६	७	०	कष्टम्	सौख्यम्	क्लेशलाभः	सुखं
९	१०	११	१२	१	२	३	४	५	६	७	८	०	सौख्यम्	लाभः	कार्यसिद्धिः	कष्टम्
१०	११	१२	१	२	३	४	५	६	७	८	९	०	क्लेशः	कष्टासिद्धिः	द्रव्यम्	धनम्
११	१२	१	२	३	४	५	६	७	८	९	१०	०	मृत्युः	लाभः	द्रव्यनाशः	शून्यम्
१२	१	२	३	४	५	६	७	८	९	१०	११	०	शून्यम्	सौख्यम्	मृत्युः	अतिकष्टम्॥

सूर्यमात्रगणयेत्त्रांद्रं स्वभिः भागमाहरेत् ॥ एककं पंचवल्गुरिन्द्राडलोनास्तित्रिभ्रयात् ॥१॥ २४


